# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीतृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ७** | गुणा: - ७० |
| विषय: - फलितज्यौतिषम् | (C.E.- 3.5.9. Old & New ) | |
| दिनाङ्क: - ११/१२/२०१८ | पञ्चस्वरा: / लघुजातकम् | समय: -१०.०० त: ०१.०० |

**प्रथमान्विति:**

**प्रश्न: १ कयोश्चित् द्वयो: सान्वयं व्याख्यां कुरु ।** **( १० )**

(१) नवनेत्राणि वर्षाणि यावद् गच्छन्ति जन्मत: ।
तावद्रिष्टं विधातव्यं गुप्तरूपं न चान्यथा ॥

(२) शन्यार्कराहुकेत्वारा: क्रूरा: शेषा:शुभग्रहा: ।
क्रूरयुक्तो बुध: क्रूर: क्षीणचन्द्रस्तथैव च ॥

(३) शुभं शुभे बुधेऽपि स्यान्मरणं राहुमन्दयो: ।
गुरुद्वये महत्सौख्यं दु:खं स्याद् भौमसूर्ययो: ॥

**प्रश्न: २ एकस्य सविस्तारं वर्णनं कुरु ।** **( १० )**

(१) ग्रहाणामुच्चनीचादिकथनम्

(२) अंतर्दशासाधनम् ।

**द्वितीयान्विति:**

**प्रश्न: ३ द्वयो: सान्वयं व्याख्यां करोतु ।** **( १० )**

(१) एवं क्रमेण दातव्यो वर्षपूर्णं यथा भवेत् ।
तिथि: प्रतिपदादिश्च कुजादिर्वारनिर्णय: ॥

(२) षड्भिर्भक्त्या तिथिर्ग्राह्या वारो ग्राह्यश्चसप्तभि: ।
पक्षेन्दुशेषिते लग्नं घटीभिश्च घटीं वदेत् ॥

(३) मृत्युस्थो यदि वा भौम: शत्रुगेहेन्दुसंयुत: ।
एषनाशकरो योगो द्विजिह्वेन न संशय: ॥

**प्रश्न: ४ अधोलिखितेषु कस्यचिदेकस्य उपरि निबन्धं निबन्धयत ।** **( १० )**

(१) निधनयोगा: ।

(२) अरिष्टभङ्गयोगा: ।

### तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु कयोश्चत् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) स्वग्रहाद्द्वादशभागाः द्रेष्काणाः प्रथमपञ्चनवपानाम् ।
होरे विषमेऽर्केन्द्वोः समराशौ चन्द्रतीक्ष्णांशोः ॥

(२) प्राच्यादिषु जीवबुधौ सार्यारौ भास्करिः शशाङ्कसितौ ।
उदगयने शशिसूर्यौ वक्रेऽन्ये स्निग्धविपुलाश्च ॥

(३) विषमर्क्षे विषमांशे संस्थिताश्च गुरुशशाङ्कलग्नार्काः ।
पुञ्जन्मकराः समभेषु योषितांशमनवांश गताः ॥

**प्रश्नः ६ एकस्य सविस्तारं वर्णनं कुरु ।** **( १० )**

(१) अरिष्टभंगयोगाः ।

(२) अक्षययोगाः ।

### चतुर्थान्वितिः

**प्रश्नः ७ कश्चनदशप्रश्नानां लघूत्तरं लिखन्तु ।** **( १० )**

(१) ''पञ्चस्वरा'' कः विरचितवान् ?

(२) जन्मतः कति वर्षाणि पर्यन्तं अरिष्टप्रमाणम् ?

(३) त्रिपातकीचक्रे कति रेखाः भवन्ति ?

(४) 'अज' राशिस्वामी कः ?

(५) ''दानवगुरुः'' राशिभोग्यकालः कति दिनानि ?

(६) केतुपताकीचक्रे आरम्भनक्षत्रः कः ?

(७) उदितस्वरे किं फलम् ?

(८) स्वराणां संख्या का ?

(९) भद्रातिथिस्वरः कः ?

(१०) मीनस्य प्रथमद्रेष्काणे किं फलम् ?

(११) लघुजातकस्य रचयिता कः ?

(१२) कस्य जातकस्य त्रिकोणसंज्ञा ?

(१३) मेषराशेः सूर्यस्य उच्चांशाः कः ?

(१४) ग्रहाणां गुणप्रकाराः के ?

(१५) वृषभराशिस्वामीग्रहः कः ?

--००--